दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् ज्येष्ठशुक्लसप्तमी
आषाढः 07 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-239 | 1 | जून 21, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 प्रधानमन्त्री नरेन्द्रमोदी राष्ट्रपतिना द्रौपदीमुर्मु इत्यनया सह ओडिशा-राज्ये षड्शताधिकसप्तचत्वारिंशत्सहस-कोटिरूप्यकाणां परियोजनानां उद्घाटनम् अकरोत्

3 क्वांटम- तकनीक- भूकम्प- जलवायुपरिवर्तनेषु अनुसन्धानं करिष्यति आईआईटी-मण्डी- लक्ष्मीधरबेहरा

4 प्रभावः शून्यः, शरीराय अत्यधिकं हानिकराः, सर्वकारेण १६ औषधेषु प्रस्थापितः प्रतिबन्धः

## कोलकाता-नगरस्य ऐतिहासिके 'रेड रोड' मार्गे द्वादशः अन्तर्राष्ट्रीययोगदिवसः आयोजितः; प्रधानामात्येन नरेन्द्रमोदिना कार्यक्रमस्य नेतृत्वं कृतम्






**हिमसंस्कृतवार्ता, कोलकाता, २१ जून २०२६।** अद्य सम्पूर्णविश्वे सोत्साहेन अन्तर्राष्ट्रीयः योगदिवसः आचर्यते। अस्मिन्नावसरे रे देशस्य मुख्य-राष्ट्रीय-कार्यक्रमस्य भव्यम् आयोजनं पश्चिमबंगालराज्यस्य राजधान्यां कोलकाता-नगरस्य ऐतिहासिके 'रेड रोड' मार्गे अभवत्। अस्य ऐतिहासिकस्य समारोहस्य नेतृत्वं भारतस्य माननीयेन प्रधानामात्येन श्रीनरेन्द्रमोदिना कृतम्। अस्मिन् वर्षे योगदिवसः "स्वस्थायुषे योगः" (Yoga for Healthy Ageing) इति विशेष-विषयम् (थीम) आधृत्य मानितः, यः वर्धमाने वयसि शारीरिक-मानसिक-स्वास्थ्यस्य सक्रिय-जीवनशैल्याः च संवर्धने केन्द्रीकृतः अस्ति। अस्मिन् विशाले आयोजने पश्चिमबंगालस्य मुख्यमन्त्री श्रीसुवेन्दु-अधिकारी, केन्द्रीय-आयुष-राज्यमन्त्री (स्वतन्त्रप्रभारः) श्रीप्रतापरावजाधवः च सहिताः बहवः गणमान्याः नागरिकाः, योगगुरवः, सहस्रशः उत्साशिनः सामान्याः जनाः च सम्मिलिताः अभवन्।

**ऐतिहासिकी जनसहभागिता:** 'रेड रोड' मार्गे आयोजिते मुख्यसत्रे प्रायः ३५,००० तः अधिकाः पञ्जीकृताः प्रतिभागिनः एकत्र 'सामान्ययोगप्रोटोकॉल' (Common Yoga Protocol) इत्यस्य अभ्यासम् अकुर्वन्। एतदतिरिच्य देश-विदेशातः लक्षशः जनाः आभासीरूपेण (वर्चुअली) अन्यान्यमाध्यमैः अस्मिन् कार्यक्रमे सम्मिलिताः अभवन्।

### हुग्ली-नद्यां भव्यं प्रदर्शनम्:

योगदिवसस्य उपलक्षणे हुग्ली-नद्यां एकोनषष्टि (५९) नौकासु एकदैव सामूहिकयोगप्रदर्शनं कृतम्, यत् बङ्गालस्य सांस्कृतिकपरिचयं योगस्य च अपूर्वं सङ्गमं प्रदर्श्यति।

**'धावनात् ध्यानं प्रति' (Run for Yoga) तथा 'वन्दे योगम्':** मुख्यायोजनात् पूर्वं, कोलकाता-नगरे १९ जून् दिनाङ्के ११ स्थानेषु "धावनात् ध्यानं प्रति" (Run for Yoga) कार्यक्रमः आयोजितः आसीत्। अपरपक्षे २० जून् दिनाङ्के नद्याः तटेशु प्रविध्युत्सवः संस्कृतिसमन्वितः 'वन्दे योगम्' उत्सवः आसीत्।

### त्रिसहस्रं (३,०००) द्रोण-यन्त्राणां प्रदर्शनम्:

अस्मिन् अवसरे कोलकाता-नगरं 'योगराजधानी' रूपेण प्रदर्शयितुं नगरस्य प्रमुखाः सेतवः विशेषदीपैः अलङ्कृताः, त्रिसहस्रतः (३,०००) अधिकैः द्रोण-यन्त्रैः (Drones) भव्यं प्रदर्शनं कृतम्।

### प्रधानामात्यस्य श्रीनरेन्द्रमोदिनः सन्देशः:

"योगः केवलं कस्यचित् एकस्य दिवसस्य गतिविधिः नास्ति, अपितु स्वस्थस्य दीर्घस्य च जीवनस्य आधारः अस्ति। अस्मिन् वर्षे 'स्वस्थायुषे योगः' इति विषयः अस्मान् स्मारयति यत् यथा-यथा अस्माकं वयः वर्धते, तथा-तथा योगः अस्मान् शारीरिकरूपेण स्वावलम्बिनः मानसिकरूपेण च सुदृढान् कर्तुं साहाय्यं करोति।"

### 'योग ३६५' इति उपक्रमस्य आरम्भः

अस्मिन् अवसरे केन्द्रीय-आयुष-मन्त्रालयेन 'योग ३६५' इति उपक्रमः विशेषरूपेण अधोरेखितः, यस्य उद्देश्यं योगं केवलं दिवसविशेषस्य उत्सवे सीमितं न कृत्वा जनानां दैनन्दिनजीवने समावेशितं करणम् अस्ति। अनेन सह जीवनशैल्यनुसारं जायमानानां रोगाणां (यथा- मधुमेहः, उच्चरक्तचापः च) कृते विशेषरूपेण निर्मिताः अङ्कीयाः (डिजिटल) नियमावल्यः (प्रोटोकॉल) अपि प्रसारिताः। कोलकाता-नगरे आयोजितेन अनेन भव्येन राष्ट्रीयकार्यक्रमेण न केवलं सम्पूर्णं नगरं योगमयं जातम्, अपितु वैश्विकमञ्चे भारतस्य प्रासङ्गिकता अपि सुदृढा अभवत्।

## सर्वकारः सार्वजनिक-हिताय षोडश निश्चित-मात्रा-औषध-संयोजनानां निर्माणम्, विक्रयणं, वितरणं च निषेधितवान्



सर्वकारेण तत्क्षणप्रभावेण समानोपयोगाय षोडश-निश्चित-मात्रा-संयोजन-औषधानां निर्माणम्, विक्रयणं, वितरणं च प्रतिषिद्धम्। उपक्रमोऽयं सर्वोच्च-न्यायालयेन निर्देशिते औषध-तान्त्रिक-परामर्शि-मण्डलेन स्थापितया विशेषज्ञसमित्या समीक्षायाः अनन्तरम् अभवत्। यस्मिन् ज्ञातम् यत् औषध-संयोजनानां चिकित्सात्मक-समर्थनस्य अभावः अस्ति अथ स्वास्थ्य-सङ्कटानि भवितुम् अर्हन्तीति। प्रतिबन्धितेषु उत्पादेषु कति-पयानि त्वक्-रोग-निवार-काणि, वेदना-निवारकाणि, एण्टिस्पास्मोडिक्, एण्टि-बायोटिक्-आधारितानि च औषधानि सन्ति।

## राष्ट्रियसुरक्षायाः प्रभावीसीमाप्रबन्धनस्य च विषये सर्वकारस्य प्रतिबद्धतां पुनः उक्तवान् अमितशाहः।

केन्द्रीयः गृहमन्त्री अमितशाहः राष्ट्रियसुरक्षायाः प्रभावीसीमाप्रबन्धनस्य च विषये सर्वकारस्य प्रतिबद्धतां पुनः उक्तवान्। अवैधप्रवासस्य निवारणस्य प्रयत्नाः दृढनिश्चयेन निरन्तरं प्रवर्तन्ते इति सः उक्तवान्। श्रीशाहः अवदत् यत् प्रधानमन्त्रिणः नरेन्द्रमोदीवर्यस्य नेतृत्वे भारते विगत द्वादश-वर्षेषु विकासक्षेत्रे, सांस्कृतिक-पुनरुज्जीवनक्षेत्रे, राष्ट्रिय-सुरक्षायां, वैश्विक-मान्यतायां च महती प्रगतिः अभवदिति। सः अवदत् यत् एतानि वर्षाणि देशस्य इतिहासे परिवर्तनशील-कालः इति स्मर्यते। कोल्हापुर नगरे प्रायः सार्धचतुर्दशशत-कोटिरूप्यकाणां श्री-अम्बाबाई-मन्दिर-विकास-परियोजनायाः उद्घाटनानन्तरं जनसमूहं सम्बोधयन् श्रीशाहः अवदत् यत् विकास-परियोजनैषा ऐतिहासिक-सांस्कृतिक-आध्यात्मिक-परम्परायाः संरक्षणं कुर्वन्ती मन्दिर-परिसरं आधुनिक-तीर्थस्थानरूपेण परिवर्तयिष्यति।

## सुभाषितम्

**तं विद्याद्दुःखसंयोग-**
**वियोगं योगसंज्ञितम्।**
**स निश्चयेन योक्तव्यो**
**योगोऽनिर्विण्णचेतसा॥**

अर्थात्- जो अवस्था सांसारिक दुखों और कष्टों के संपर्क से पूरी तरह रहित (मुक्त) है, उसी का नाम 'योग' है। साधक को चाहिए कि वह इस योग का अभ्यास बिना किसी निराशा के, दृढ़ संकल्प और पूरे मनोयोग (धैर्य) के साथ करे।

दैनिकम् ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## फीफा विश्वकप इति क्रीडायां ब्राजील-देशः हैति-देशम् त्रि-शून्यांकैः पराजय्य प्रथमवारं विजयमलभत्



ब्राजील-देशः फिलाडेल्फिया-क्रीडाङ्गणे हैती-देशस्य उपरि त्रीणि-शून्यम् इत्यकैः सहजतया विजयं प्राप्य फ़ीफ़ा-विश्वकप-क्रीडायां स्वस्य प्रथमं विजयम् अभिलिखत्। मैथ्यूस कुन्हा इत्येषः पञ्चवारं यावत् विश्वविजेतृणां कृते उत्कृष्ट प्रदर्शनम् अकरोत्, प्रथमार्धे द्विवारं गोल् इति कृतवान्।

# प्रधानमन्त्री नरेन्द्रमोदी राष्ट्रपतिना द्रौपदीमुर्मु इत्यनया सह ओडिशा-राज्ये षड्शताधिकसप्तचत्वारिंशत्सहस्र- कोटिरूप्यकाणां परियोजनानां उद्घाटनम् अकरोत्



प्रधानमन्त्रिणा नरेन्द्रमोदिना ओडिशा-राज्यस्य प्रगतेः प्रशंसा कृता यत्र मुख्यमन्त्रिणः मोहनचरण माझिनः नेतृत्वे राज्येन वर्षद्वयं पूरितम्। सः अवदत् यत् एतत् राज्यं द्रुतगत्या विकासस्य मार्गे अग्रे गच्छति तथा च पूर्वीभारतस्य विकासाय महत्त्वपूर्णं योगदानं प्रददाति। मयूरभञ्ज-जनपदस्य रायरङ्गपुरे जनसमूहं सम्बोधयता, प्रधानमन्त्रिणा राष्ट्रपतये जन्मदिनस्य शुभाशयाः प्रदत्ताः, तस्याः पैत्रिकग्रामे पहाड़पुरे आगमनं सौभाग्यम् अस्तीति उक्तवान्। सः अघोषयत् यत् पहाड़-पुरं सूर्यग्रामरूपेण अथवा सौरग्रामरूपेण विकसितः भविष्यति, यत्र पुनर्नवीकरणीय ऊर्जा-आधारित-संरचनाः, आधुनिक-सार्वजनिकसेवाः च भविष्यन्ति। प्रधानमन्त्री बहुविधक्षेत्रेषु प्रायः सप्तचत्वारिंशत्-सहस्र-कोटि-रूप्यकाणां विकास-परियोजनानां उद्घाटनम्, शिलान्यासं च कृतवान्। सः अवदत् यत् केन्द्रस्य पूर्वोदयदर्शनस्य उद्देश्यं पूर्वीभारतस्य द्रुतगत्या विकासस्य माध्यमेन भारतस्य विकासं प्रवर्तनीयम् । राष्ट्रपतिः द्रौपदीमुर्मु इत्येषा प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वस्य प्रशंसाम् अकरोत्, सः स्वस्य दूरदर्शी-शासनस्य, विश्वनेतृभिः सह रचनात्मक-सहभागित्वस्य च माध्यमेन वैश्विक-मञ्चे भारतस्य प्रतिष्ठां प्रभावं च महत्त्वपूर्णरूपेण वर्धितवान् इति उक्तवती। एकां जनसभां सम्बोधयन्ती राष्ट्रपतिः अवदत् यत्, प्रधानमन्त्रिणः मोदिनः नेतृत्वे भारतं निरन्तरं शान्तेः, संवादस्य, सहकारस्य च स्वररूपेण उद्भूतम् अस्ति।

# भारतम् सोमवासरादारभ्य द्वि-दिवसीयं ब्रिक्स्-राष्ट्रिय-सुरक्षा-परामर्शकानां सम्मेलनम् आयोजयिति



भारतम् सोमवासरादारभ्य द्वि-दिवसीयं ब्रिक्स्-राष्ट्रिय-सुरक्षा-परामर्शकानां सम्मेलनम् आयोजयिति। अस्य सम्मेलनस्य अध्यक्षः राष्ट्रिय-सुरक्षा-परामर्शकः अजित डोभालः भविष्यति। सम्मेलनावसरे, राष्ट्रिय-सुरक्षा-परामर्शकाः, ब्रिक्स् सदस्यराष्ट्राणां प्रतिनिधिमण्डल-प्रमुखाश्च "अद्य जगतः सम्मुखीकृताः अपारम्परिक सुरक्षा-समस्याः" इति विषये विचार-विनिमयं करिष्यन्ति। राष्ट्रिय सुरक्षा-परामर्शकाः, प्रतिनिधिसङ्घस्य प्रमुखाश्च आतङ्कवाद-निरोध-विषये, सूचना-सम्प्रेषण-तन्त्रज्ञानस्य उपयोगे सुरक्षाविषये सद्यः आयोजितेषु ब्रिक्स्-संयुक्तकार्यसमूहानां परिणामानाम् अपि समीक्षां करिष्यन्ति।

# ढाका-नगरे गुञ्जिताः 'जय श्रीराम' इति घोषाः; मार्गान् अवतीर्णाः हिन्दवः



मुस्लिम-बहुले बाङ्गलादेशे (बांग्लादेश) अल्पसङ्ख्यकानां अधिकाराणां विषये पुनः एकदा चिन्ताः गभीराः अभवन्। राजधान्यां ढाका-नगरे सहस्रशः हिन्दवः भगवतः रामस्य चित्रस्य कथित-अपमानस्य तथा च एकस्याः भव्यायाः मूर्तेः निर्माण-अवरोधस्य विरोधे विशालं मशाल-जुलूसं (हस्तदीप-यात्राम्) अकुर्वन्। अस्मिन् अवसरे महत्या सङ्ख्यायाम् एकत्रिताः जनाः 'जय श्रीराम' इति जयघोषम् अपि अकुर्वन्।

रङ्गपुरे कट्टरपन्थिभिः भगवतः रामस्य सर्वोच्चायाः मूर्तेः निर्माणस्य विरोधं कृत्वा कथितरूपेण तस्य चित्रस्य अपमानं कृतम्, यस्मात् कारणात् ढाका-नगरे प्रचण्डं विरोधप्रदर्शनं प्रारब्धम् अस्ति। सहस्रशः हिन्दवः अपराधिनां निग्रहस्य (गिरफ्तारी इति) माङ्गं कुर्वन्तः ढाका-नगरे मशाल-जुलूसं कृतवन्तः, 'जय श्रीराम' इति घोषांश्च अकुर्वन्। हिन्दू-महाजोट् (हिन्दू-महासङ्घः) इत्यस्य आह्वानेन बहवः हिन्दू-सङ्गठनानां छात्राणां च समूहाः प्रमुखे 'शाहबाग' चतुरपथे (चौराहे) एकत्रिताः अभवन्, ततः च 'नेशनल प्रेस क्लब' पर्यन्तं पदयात्रां कृतवन्तः। अपरपक्षे, रङ्गपुरे आरक्षकैः (पुलिस-बलैः) प्रतिरोधिनां रोधनात् परं लघ्वी सङ्घर्षस्य (झड़प) वार्ता अपि प्राप्ता अस्ति।

# ऋतुविज्ञानविभागेन उपहिमालयीय-पश्चिमबङ्गस्य सिक्किमस्य च पृथक् पृथक् स्थानेषु अत्यधिकवृष्ट्यै रेड्-अल- इति रक्तवर्णीया संचेतना दत्तास्ति

भारत-ऋतु-विज्ञान-विभागेन उपहिमालयीय-पश्चिमवङ्गस्य सिक्किमराज्यस्य च पृथक् पृथक् स्थानेषु अत्यधिकवृष्ट्यै रक्तवर्णीया पूर्वसन्चेतना प्रदत्ता अस्ति। ऋतुविभागेन दिने केरल-माहे-तमिल्नाडु-पुदुचेरी-करैकल्-प्रदेशेषु पूर्वोत्तरभागेषु च प्रचण्डवृष्टेः पूर्वानुमानं प्रकटितम् अस्ति। हरियाणा, चण्डीगढ, पञ्जाब, दिल्ली, उत्तराखण्ड, पूर्वीमध्यप्रदेश, जम्मू-कश्मीर, लद्दाख, हिमाचलप्रदेशेषु च विद्युद्योतनेन सह मेघगर्जनस्य सम्भावना ऋतु-विभागेन प्रकटिता। बिहार, आन्ध्रप्रदेश, उत्तरान्तरिक-कर्नाटक, तेलङ्गाना, विदर्भ, अण्डमान्-निकोबार्-द्वीपेषु च आगामि दिनयोः एतादृशी स्थितिः भविष्यति।

# देहली-नगरे 'दीपस्तंभ फाउंडेशन मनोबल' इत्यनया संस्थया 'यशोत्सव २०२६' कार्यक्रमः आयोजितः

गतदिने देहल्यां 'दीपस्तंभ फाउंडेशन मनोबल' इति संस्थया 'यशोत्सव २०२६' इति कार्यक्रमः आयोजितः। अस्मिन् कार्यक्रमे तेषां दिव्याङ्गानां, अनाथ-बालानां, उभयलिङ्गिनां (ट्रांसजेंडर), आर्थिकरूपेण दुर्बलवर्गीयाणां च छात्राणां सम्माननं कृतम्, यैः विपरीतपरिस्थितीनां सामनां कुर्वद्भिः यूपीएससी (UPSC), एसएससी (SSC), वित्तकोष-सेवा (बैंकिंग), राज्यसेवा, क्रीडा, शिक्षा तथा च अन्तर्राष्ट्रीयविश्वविद्यालयेषु अध्ययनम् इत्यादिषु विभिन्नक्षेत्रेषु उल्लेखनीया सफलता प्राप्ता अस्ति। अस्मिन् अवसरे मुख्यमन्त्री रेखा गुप्ता अवदत् यत् 'यशोत्सवः' केवलं कश्चित् सम्मानसमारोहः नास्ति, अपितु एषः सङ्घर्षस्य, सङ्कल्पस्य, सफलतायाः च उत्सवः अस्ति। सा अकथयत् यत् अद्य सम्मानिताः छात्राः एतत् सिद्धवन्तः यत् उचितेन अवसरेण, मार्गदर्शनेन, आत्मविश्वासेन च किमपि स्वप्नम् असम्भवं न भवति। मुख्यमन्त्री 'दीपस्तंभ फाउंडेशन' इति संस्थया सुलभ-सर्वसमावेशी-शिक्षाक्षेत्रे क्रियमाणानां कार्याणां भूरिशः प्रशंसां कुर्वती अवदत् यत् एषा संस्था वञ्चितवर्गीयाणां यूनां कृते केवलं शिक्षामेव न, अपितु आत्मविश्वासं, दिशं, नवीनं जीवनं च दातुं कार्यं करोति।



# आरब्धा कैलाश-मानसरोवर-यात्रा, 'नाथू ला' गिरिदारेण (दर्रे) चीन-देशं प्राप्तः तीर्थयात्रिणां प्रथमः समूहः

कैलाश-मानसरोवर-यात्रा-२०२६ इत्यस्य कृते प्रस्थितः तीर्थयात्रिणां प्रथमः समूहः शनिवारे 'नाथू ला' गिरिदारे स्थितात् भारत-चीन-सीमान्ततः चीन-देशे प्राविशत्। अनेन प्रकारेण पवित्र-कैलाश-मानसरोवर-यात्रायाः शुभारम्भः अभवत्। सिक्किम-राज्यस्य राज्यपालः ओम् प्रकाश माथुरः, पर्यटनमन्त्रिणः शेरिंग थेनडुप भूटिया महोदयस्य तथा च सिक्किम-पर्यटन-विकास-निगमस्य (STDC) अधिकारिणाम् उपस्थितौ समूहं हरितपताकां प्रदर्श्य प्रस्थापितवान्। प्रथमे समूहे चतुरः सम्पर्क-अधिकारिणः एकं चिकित्सा-अधिकारिणं च सम्मील्य चतुश्चत्वारिंशत् (४४) तीर्थयात्रिणः सन्ति। एतेषु द्वात्रिंशत् (३२) पुरुषाः द्वादश (१२) महिलाः च सन्ति, ये बिहार-हरियाणा-राजस्थान-महाराष्ट्र-देहली-पञ्जाब-तमिलनाडु-कर्नाटक-मध्यप्रदेश-आन्ध्रप्रदेश-उत्तरप्रदेश-ओडिशा-सहितान् विभिन्न-राज्यान् प्रतिनिधिसं कुर्वन्ति। राज्यपालः तीर्थयात्रिभ्यः सुखद-सुरक्षित-यात्रायाः शुभाशंसाः दत्तवान्।

# क्वांटम- तकनीक- भूकम्प- जलवायुपरिवर्तनेषु अनुसन्धानं करिष्यति आईआईटी-मण्डी- लक्ष्मीधरबेहरा



हिमसंस्कृतवार्ताः- मण्डी।भारतीय-प्रौद्योगिकी-संस्थानम् (आईआईटी) मण्डी आगामिषु वर्षेषु क्वांटम-तकनीक, भूकम्प, जलवायुपरिवर्तनं च इति सदृशेषु महत्त्वपूर्णक्षेत्रेषु बृहत्स्तरे अनुसन्धानं करिष्यति। संस्थानस्य निदेशकः प्रो. लक्ष्मीधरबेहरा शनिवासरे आयोजिते १४ तमे दीक्षान्तसमारोहे अकथयत् यत् केन्द्रसर्वकारेण क्वांटम-तकनीक-विकासाय संस्थानाय २०० कोटिरूप्यकाणां परियोजना स्वीकृता अस्ति, यस्याः अन्तर्गतं अत्याधुनिक- अनुसन्धानकार्याणि विधास्यन्ते। प्रो. बेहरा अवदत् यत् क्वांटम-तकनीक भविष्यस्य अत्यन्तं महत्त्वपूर्णासु प्रविधिषु अन्यतमा अस्ति। अस्याः माध्यमेन न्यूनपरिव्यययुक्तानां उच्चक्षमतावतां सङ्गणक-प्रणालीनां (कंप्यूटिंग सिस्टम) विकासस्य दिशि कार्यं क्रियमाणं वर्तते। वर्तमाने महासङ्गणकस्य (सुपर कंप्यूटर) निर्माणे सञ्चालने च भूरि-व्ययः भवति, परन्तु संस्थानं तादृशीषु प्रविधिषु कार्यं करोति याः भविष्ये इमं व्ययं न्यूनीकर्तुं शक्ष्यन्ति।आईआईटी-मण्ड्यां शीघ्रमेव जलवायुपरिवर्तनेन आपदाप्रबन्धनेन च सम्बद्धानां अनुसन्धानकार्याणां नवीना गतिः प्रदास्यते। अस्य कृते विशेषकेन्द्रस्य स्थापनायाः दिशि कार्यं प्रचलन् अस्ति। हिमालयीयराज्येषु वर्धमानाः प्राकृतिकापदः दृष्ट्वा संस्थानं भूकम्पसम्बद्धाय अनुसन्धानमपि प्राधान्यं ददाति। अस्यामेव शृङ्खलायां भूकम्पस्य प्रभावानां संरचनानां च दृढतायाः अध्ययनाय त्रिविमीय- लोलकम् ('थ्री-डी पेंडुलम') विकस्यमानं वर्तते, यत् शोधकर्तृभ्यः नवीनाः सूचनाः उपलापयिष्यति। निदेशकः अवदत् यत् संस्थानं आपदाप्रबन्धनक्षेत्रे केवलं शोधकार्याणि यावत् सीमितं न स्थास्यति, अपितु जनान् जागरूकान् प्रशिक्षितान् च कर्तुमपि कार्यं करिष्यति। आरक्षकबलस्य (पुलिस) अन्यासां सुरक्षासंस्थानां च सहयोगेन सामान्यनागरिकेभ्यः आपदाकाले रक्षणस्य सुरक्षायाश्च उपायान् शिक्षयितुं योजना रच्यमाना अस्ति।

प्रो. बेहरा अवदत् यत् आईआईटी-मण्डी युवानं जीविकान्वेषकं न, अपि तु जीविकाप्रदातारं विधातुं दिशि अपि कार्यं करोति। संस्थानस्य प्रयासः अस्ति यत् इतः शिक्षां प्राप्नुवत्सु कनिष्ठतः १० प्रतिशतं छात्राः उद्यमिनः भवेयुः अन्येभ्यश्च जीविकायाः अवसरान् सृजेयुः। संस्थानं 'विकसितभारत-२०४७' इत्यस्य लक्ष्यं ध्यात्वा शिक्षां, अनुसन्धानं, नवाचारं (इनोवेशन) च नवीनां दिशं यच्छति। संस्थानेन साम्प्रतमेव प्रायः १०० कोटिरूप्यकाणां बाह्यप्रायोजिताः अनुसन्धानपरियोजनाः अवाप्ताः।

### 'मेड इन इण्डिया' इत्यस्मै वैश्विकीं प्रतिष्ठां दापने 'ए.आई.' (कृत्रिमबुद्धेः) मुख्या भूमिका- गोयनका

आईआईटी-मण्ड्याः १४ तमे दीक्षान्तसमारोहे 'वेलस्पन' समूहस्य संस्थापकः अध्यक्षश्च (चेयरमैन) बी.के. गोयनका छात्रेभ्यः परिवर्तमानस्य विश्वस्य आह्वानानां कृते सन्नद्धाः भवितुं सन्देशं दत्तवान्। सः अवदत् यत् अद्यतने युगे केवलं उपाधिः (डिग्री), अङ्काः, ज्ञानं च पर्याप्तं नास्ति। तीव्रगत्या परिवर्तमाने संसारे साफ़ल्यं ते एव प्राप्स्यन्ति ये परिवर्तनं स्वीकरिष्यन्ति, संकटं वक्ष्यन्ति, स्वज्ञानं च प्रभावशालिरूपेण प्रयोक्तुं शक्ष्यन्ति। गोयनका अवदत् यत् भारतेन 'मेड इन इण्डिया' इत्यस्य स्वप्नं साकारं कर्तुं ए.आई. इत्यस्य तकनीकस्य च प्रभावकारी उपयोगः करणीयः भविष्यति।

### प्रविधिः संसारं परिवर्तयिष्यति, मानवीयानां आह्वानानां समाधानं तु अवशिष्टम् - बनर्जी

आईआईटी-देहल्याः निदेशकः प्रो. रङ्गनबनर्जी अवदत् यत् तकनीकस्य ए.आई. इत्यस्य च तीव्रप्रगतेः सत्यामपि बुभुक्षा, दारिद्र्यं, स्वच्छा ऊर्जा, स्वास्थ्यं, सुरक्षा च इत्यादयः आह्वानानि अद्यापि विश्वस्य समक्षं वर्तन्ते। सः अकथयत् यत् भारतं वर्ष २०४७ यावत् विकसितराष्ट्रं भवितुं दिशि अग्रे सरति। एतादृश्याम् अवस्थायाम् अद्य स्नातकाः भवन्तः छात्राः आगामि- द्वयोः दशकयोः देशस्य विश्वस्य च परिवर्तनस्य प्रमुखाः भागिनः भविष्यन्ति।

# निष्क्रिय-वित्तकोषसंख्यानां सक्रियीकरणाय साइबर-अपराध-निरोधाय च अभियानम् आरब्धम्



हिमसंस्कृतवार्ताः- शिमला।हिमाचलप्रदेशे निष्क्रियाणां वित्तकोषसंख्यानां (डॉर्मेंट अकाउंट्स) पुनः सक्रियीकरणाय, सामाजिकसुरक्षा- योजनानां व्याप्तिवर्धनार्थं तथा च वर्धमान-साइबर-प्रवञ्चनां प्रति जनानां प्रबोधनाय वित्तकोषसंख्याः १५ जुलाई दिनाङ्कपर्यन्तं विशेष-गहन-संतृप्ति-अभियानं चालयिष्यन्ति। वित्तीयसेवाविभागस्य निदेशकेन विवेकगुप्तेन सार्वजनिक-निजी-क्षेत्रयोः वित्तकोषेभ्यः एतत् अभियानं युद्धस्तरे चालयितुं निर्देशाः दत्ताः। सः अवदत् यत् कोऽपि पात्रः व्यक्तिः केन्द्रस्य वित्तीय- समावेशन- सामाजिकसुरक्षा- योजनाभ्यः वञ्चितः न भवेत्। शनिवासरे राजधान्यां शिमलायाम् आयोजितायाम् उपवेशने दूरस्थानां, पर्वतीयानां, न्यून- कवरेज-युक्तानां च क्षेत्राणां कृते बैंकिंग-सेवानां विस्तारं विधातुं विशेषं बलं दत्तम्। अधिकारिभिः स्पष्टीकृतं यत् अभियानस्य उद्देश्यं केवलं नवीनलाभार्थिनां योजनं नास्ति, अपि तु निष्क्रिय-वित्तकोषसंख्यानां पुनरुज्जीवनं कृत्वा वित्तीयप्रणाल्या सह अधिकाधिकान् जनान् सक्रियतापूर्वकं योजनमपि अस्ति। गोष्ठ्यां प्रधानमंत्री- जीवनज्योति-बीमायोजना, प्रधानमंत्री-सुरक्षाबीमायोजना, अटलपेंशनयोजना च इति एताः अभियानस्य प्रमुखाणि केन्द्रबिन्दूनि विधातुं निर्णयः गृहीतः। वित्तकोषेभ्यः निर्देशाः दत्ताः यत् पात्रनागरिकेभ्यः एतासां योजनानां लाभानां सूचनां प्रदाय अधिकाधिकं नामाङ्कनं सुनिश्चितं कुरुत। अभियाने पुनः-के.वाई.सी. (Re-KYC) प्रक्रियां तीव्रगत्या पूरयिष्यते।

### नवीनानां जनधन-खातानां उद्घाटने अपि ध्यानं प्रदास्यते

एतदतिरिच्य वित्तकोषसंख्यासु नामाङ्कन (नॉमिनेशन)- दर्पणाय, दीर्घकालात् निष्क्रियाणां कोषाणां सक्रियीकरणाय, नवीनानां प्रधानमंत्री-जनधन- कोषाणाम् उद्घाटनावसरे च विशेषं ध्यानं प्रदास्यते। वित्तकोषेभ्यः निर्देशः अस्ति यत् ते तादृशैः संख्याधारकैः सह साक्षात् सम्पर्कं विधाय आवश्यकाः औपचारिकताः पूरयेयुः। हिमाचलस्य भौगोलिकपरिस्थितीः दृष्ट्वा उपवेशने वर्षाकालात् (मानसून) पूर्वं जाग्रतापूर्वकं अधिकतमग्रामाणां दुर्गमक्षेत्राणां च व्याप्ति-रणनीतिं प्रति विमर्शः जातः। अधिकारिणः अकथयन् यत् वर्षाकाले बहुषु क्षेत्रेषु गमनं बाधितं भवितुं शक्नोति, अतः वित्तकोषाः आगामिषु कतिपयेषु सप्ताहेषु ग्रामीण-आन्तरिक-भागेषु विशेषशिबिराणि आयोज्य योजनानां लाभं प्रापयितुं प्रयतन्ते। राज्यस्तरीय-बैंकर्स-समितेः संयोजकेन कमलशर्मणा ज्ञापितं यत् सम्पूर्णप्रदेशे नियमितशिबिरैः सह 'मेगा कैंप' अपि आयोजयिष्यन्ते।

# हिमाचलस्य पार्श्वे वर्तते खर्वाणां कोषः, हरित-अर्थव्यवस्थया सुवर्णपक्षी भविष्यति प्रदेशः

हिमसंस्कृतवार्ताः — शिमला।

हिमाचलस्य पार्श्वे खर्वाणां (खरबों का) कोषः वर्तते, यः अधुना अन्विष्टः। यदि अस्य सम्यक्तया उपयोगः भवेत्, तर्हि हिमाचलप्रदेशः सुवर्णपक्षी (सोने की चिड़िया) भविष्यति। आम् सत्यम्! एकस्मिन् प्रतिवेदने (रिपोर्ट) प्रकटीकृतं यत् हिमाचलस्य पार्श्वे २२,६०० कोटिरूप्यकाणां सम्पत्तिः अस्ति। हिमाचलप्रदेशस्य वनानि प्रदेशस्य महती सम्पदा वर्तते। राज्यस्य एतानि अनघ्राणि वनानि आगामिनि समये प्रदेशस्य अर्थव्यवस्थायै नवीनां शक्तिं प्रदातुं शक्नुवन्ति। वनविभागस्य ‘इण्डियन स्कूल ऑफ बिजनेस’ (आईएसबी) इत्यस्य च संयुक्ते प्रतिवेदने प्रकटीकृतं यत् वनेषु विद्यमानानां संसाधनानां सम्यग्-उपयोगं कृत्वा प्रायः २२,६०० कोटिरूप्यकाणां हरित-अर्थव्यवस्था उत्थापयितुं शक्यते। प्रतिवेदानुसारं हिमाचलस्य वनेषु वन्यफलानि, औषधीयपादपाः, चीड़-वृक्षस्य पत्रसूचयः (चीड़ की सुइयां), काष्ठं, वंशाः (बांस) च इत्यादिषु संसाधनेषु महत्यः आर्थिकसम्भावनाः निहिताः सन्ति। एतेषां वैज्ञानिकरीत्या उपयोगे कृते ग्रामीणक्षेत्रेषु जीविकायाः आयस्य च नवीनाः अवसराः उत्पन्नाः भवितुं शक्नुवन्ति। मुख्यसचिवेण के.के. पन्तेन एतद् प्रतिवेदनं प्रसार्योक्तं यत् आधुनिकतकनीकस्य कृत्रिमबुद्धेः (ए.आई.) च साहाय्येन वनानां वास्तविकक्षमतायाः मूल्याङ्कनम् विहितम्।अनेन वनसम्पदायाः संरक्षणेन सह जनेभ्यः आर्थिकलाभप्रापणस्य मार्गः अपि मोक्ष्यते। प्रतिवेदने वन्यफलानां स्वास्थ्योत्पादानां च आपणं (बाजार) ११,३४० कोटिरूप्यकाणि, चीड़-पत्रसूचि-आधारित-उद्योगः ५,५०० कोटिरूप्यकाणि, काष्ठोद्योगः ५,००० कोटिरूप्यकाणि तथा च वंशाधारित-उद्योगः ७६० कोटिरूप्यकाणां मूल्याङ्कितः अस्ति। विदुषां मतम् अस्ति यत् एतेषु क्षेत्रेषु कार्यवर्धनेन सहस्रशः जनेभ्यः स्थानीयस्तरे जीविका प्राप्तुं शक्नोति।

# प्रभावः शून्यः, शरीराय अत्यधिकं हानिकराः, सर्वकारेण १६ औषधेषु प्रस्थापितः प्रतिबन्धः

हिमसंस्कृतवार्ताः — केन्द्रीय-स्वास्थ्य-एवं-परिवार-कल्याण-मन्त्रालयेन जनहिते १६ निश्चित-अनुपान-संयोजनानां (एफडीसी - फिक्स्ड डोज़ कॉम्बिनेशन) निर्माणे, विक्रये, मानवोपयोगाय वितरणे च सद्यःप्रभावेण प्रतिबन्धः प्रस्थापितः। स्वास्थ्य-एवं-परिवार-कल्याण-मन्त्रालयेन शनिवासरे ज्ञापितं यत् मन्त्रालयेन औषधि-एवं-सौन्दर्य-प्रसाधन-अधिनियम-१९४० इत्यस्य धारा-२६ए अन्तर्गतं अधिसूचनां प्रसार्य अयं निर्णयः गृहीतः। सर्वकारस्य कथनम् अस्ति यत् एतत् पदक्षेपं जनस्वास्थ्यस्य रक्षणाय तथा च केवलं वैज्ञानिकरूपेण उचित-सुरक्षित-औषधसंयोजनानां उपलब्धतां सुनिश्चितं कर्तुं धिया उत्थापितम्। मन्त्रालयेन कथितं यत् अयं निर्णयः सर्वोच्चन्यायालयस्य निर्देशानाम् अनुपालने कृतः अस्ति। न्यायालयः देशे उपलब्ध-एफडीसी-औषधानां व्यापिकां समीक्षां कर्तुं निर्दिष्टवान् आसीत्। तदनन्तरं औषधि-तकनीकी-परामर्श-मण्डलम् (डीटीएबी) इत्यनेन कस्याश्चित् विशेषज्ञसमित्याः सङ्घटनम् कृतम्, यया विभिन्नानां एफडीसी-औषधानां वैज्ञानिकपरीक्षणं कृत्वा तेषां संयोजनानां परिचयः प्राप्तः यानि तर्कहीनानि सन्ति, चिकित्सकीयम् औचित्यं न धरन्ते अथवा मानवस्वास्थ्याय सङ्कटं जनयितुं शक्नुवन्ति। विशेषज्ञसमित्याः अनुशंसानां वैज्ञानिकमूल्याङ्कनस्य च आधारेण सर्वकारेण तादृशेषु १६ एफडीसी-औषधेषु प्रक्रमः कृतः, येषां कोऽपि दृढः चिकित्सकीय-आधारः न प्राप्तः। मन्त्रालयस्य कथनम् अस्ति यत् एतेषाम् औषधानां निरन्तर-उपयोगेन सम्भावित-सङ्कटाः अधिकाः सन्ति, यत्रैव तेषां लाभाः पर्याप्ताः न मन्ताः। प्रतिबन्धितेषु औषधेषु केषाञ्चित् त्वग्रोगाणां चिकित्सायां प्रयुक्तानि औषधानि, वेदनाहर (दर्द निवारक)-आक्षेपरोधि-औषधानि तथा च एन्टिबायोटिक-आधारित-संयोजनानि सम्मिलितानि सन्ति। स्वास्थ्यमन्त्रालयेन स्पष्टीकृतं यत् सर्वकारः सुरक्षितानां, प्रभावशालिनां, वैज्ञानिकरूपेण च प्रमाणितानाम् औषधानां उपलब्धतां सुनिश्चितं कर्तुं कटिबद्धः अस्ति। एतस्मात् पूर्वमपि विस्तृत-वैज्ञानिक-समीक्षायाः परं बहूनि तर्कहीनानि एफडीसी-औषधानि प्रतिबन्धितानि सन्ति। मन्त्रालयस्य विश्वासः अस्ति यत् एतत् पदक्षेपं रोगिसुरक्षां सुदृढीकर्तुं साक्ष्याधारित-स्वास्थ्यसेवानां सम्बर्धनाय च दिशि महत्त्वपूर्णं सिद्धं भविष्यति। अधिसूचनानुसारं प्रतिबन्धितानां १६ एफडीसी-औषधानां निर्माणं, विक्रयः, वितरणं च अधुना सम्पूर्णदेशे सद्यःप्रभावेण अवरुद्धं स्थास्यति। सर्वेभ्यः राज्य-औषधि-नियन्त्रकेभ्यः, नियामक-प्राधिकारिभ्यः, प्रवर्तन-संस्थाभ्यश्च निर्देशः दत्तः यत् ते अस्य आदेशस्य कठोरतापूर्वकं पालनं सुनिश्चितं कुर्युः।

**प्रतिबन्धितानां १६ निश्चित-अनुपान-संयोजनानां (एफडीसी) विवरणम् इत्थं वर्तते-**

१. एसिटाइल सैलिसिलिक एसिड एथोहेप्टाज़ीन
२. एलोवेरा अर्क एलेंटोइन अल्फाटोकोफेरोल एसीटेट डी-पेंथेनॉल विटामिन ए
३. एलोवेरा अर्क विटामिन ई डाइमेथिकोन ग्लिसरीन
४. एलोवेरा जोजोबा तैलं विटामिन ई
५. एलोवेरा ऑरेंज ऑयल (नारङ्ग-तैलम्)
६. एलोवेरा जोजोबा तैलं व्हीट जर्म ऑयल टी ट्री ऑयल
७. एलोवेरा विटामिन ई हर्बल
८. डाइसाइक्लोमाइन पैरासिटामोल क्लिडिनियम ब्रोमाइड
९. डाइसाइक्लोमाइन पैरासिटामोल क्लिडिनियम ब्रोमाइड क्लोर्डियाज़ेपॉक्साइड
१०. ग्लिक्लाजाइड क्रोमियम पिकोलीनेट
११. पैरासिटामोल लिग्नोकेन
१२. एमोक्सिसिलिन सेराटियोपेप्टिडेज़ लैक्टोबैसिलस स्पोरोजेन्स
१३. एमोक्सिसिलिन क्लोक्सासिलिन लैक्टिक एसिड बैसिलस सेराटियोपेप्टिडेज़
१४. एमोक्सिसिलिन सेराटियोपेप्टिडेज
१५. सेफैड्रोक्सिल प्रोबेनेसिड
१६. सेफ्यूरोक्सिम सेराटियोपेप्टिडेज

# ऋतुकाव्यम्

**चैत्रान्ते मलयप्रवाहसमये ग्रीष्मो महाकर्कश**
**स्तत्तप्तांशुचयेन मर्त्यभुवनं प्रायाति दर्पेण सः।**
**तस्योष्णेन महीतलं विचलितं सर्वे गताः शङ्किता**
**दुर्वारं बलशालिनं जनगणो दृष्ट्वा पुरस्ताद्**
**यथा॥२॥**

“अन्वयः”मलयप्रवाहसमये चैत्रान्ते महाकर्कशः सः ग्रीष्मः, तत्तप्तांशुचयेन मर्त्यभुवनं दर्पेण प्रायाति। तस्य उष्णेन महीतलं विचलितं, सर्वे शङ्किताः गताः; यथा जनगणः पुरस्तात् दुर्वारं बलशालिनं दृष्ट्वा (शङ्किताः भवन्ति)।

**“ऋतुकाव्यप्रदीपः”**

वसन्ते मलयाचलात् मन्दसुगन्धिवायुः प्रवहति, जनाः तस्मिन् आनन्दिताः सन्तः पर्वाणि पालयन्ति इत्यर्थः। तस्मिन् समये एव अर्थात् चैत्रमासस्य अन्तिमपर्याये ग्रीष्मर्तुः अत्यन्त-कर्कशस्वभावः सन् प्रकटीभवति। सः ग्रीष्मः स्वस्य प्रखरैः उष्णकिरणैः सह मर्त्यलोकं स्वेच्छया दर्पेण व्याप्नोति। तस्य तीव्रोष्णतया पृथिवीतलं भयेन कम्पितमिव भवति, सर्वे जनाः उत्तापभयशङ्कया व्याकुलाः भवन्ति। यथा जनसमूहः पुरतः स्थितं दुर्निवारं महाबलवन्तं कुत्सितं पुरुषं दृष्ट्वा भयभीतः भवति, तथैव ग्रीष्मस्य प्रचण्डतां दृष्ट्वा सर्वे पृथिवीवासिनः सन्त्रस्ताः भवन्ति। अत्र ग्रीष्मकालस्य महाबलवता पुरुषेण सह सादृश्यवर्णनात् उपमालङ्कारः, शार्दूलविक्रीडितच्छन्दश्च। छन्दोलक्षणं छन्दोमञ्जर्यां यथा- सूर्याश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीडितम्- SSS, IIS, ISI, IIS, SSI, SSI, S इति।



**©टीकाकारः**
**वत्सदेशराजशर्मा**
संस्थापकाध्यक्षो वैदिकगणः, भारतम्




# “अकबर बीरबल कथा”

## “घटपूरिता बुद्धिः”

एकदा अकबरस्य राजसभायां प्रतिवेशी राजा संदेशं प्रेषितवान्- वयम् अश्रृणुम यद् भवतः राजसभायाम् अतीव बुद्धिमन्तः जनाः सन्ति तर्हि अस्माभिः प्रेषिते घटे बुद्धिं प्रेषयतु इति। सर्वे सभासदाः आश्चर्यचकिताः, भ्रमिताः च, बुद्धिं कथं घटे प्रेषिष्यामः? अकबरः बीरबलाय बुद्धिप्रेषणस्य कार्यं समर्पितवान्। बीरबलः राजदूतं चतुर्मासानां समयं याचितवान्। बीरबलेन कूष्माण्डस्य उत्तमानि बीजानि वप्तानि। बीजानां लताः सर्वत्र प्रसृता। लतासु फलानि आगतानि तदा बीरबलः नैकान् घटान् आनीतवान्। सर्वेः घटाः फलानि परितः स्थापितान्। फलानि बृहत् अभवन्। तदा घटसहितानि फलानि वृन्तं सहितं कर्तयित्वा, घटानाम् मुखानाम् उपरि वस्त्राणाम् आवरणं कृत्वा तानि घटानि राजदूताय समर्पितवान्। सह सन्देशोऽपि दत्त च- भवतः घटसहित दशघटाः पूरिता बुद्धीः वयं प्रेषितवन्तः तर्हि एकः अपि घटं न त्रोटयित्वा बुद्धिं बहिः निष्कासयतु, घटान् च प्रत्यार्पयतु। इतोऽपि बुद्धिः आवश्यकी तर्हि वदतु वयं प्रेषिष्यामः च इति। बीरबलस्य चातुर्यं दृष्ट्वा प्रतिवेशी राजा प्रसन्नः अभवत्। सः अकबरं संदेशं प्रेषितम् यद्- भवतः राजसभायां चतुरः, बुद्धिमन्तः जनाः सन्ति। अकबरः बीरबलम् उपहारं दत्वा गौरवान्वितवान्।

**डॉ. वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्**

# वार्ता-संवादः

**हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः**

नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।
किं त्वया श्रुतम्? चीनदेशे एकेन पुरुषेण विवाहाय षट्त्रिंशल्लक्षरूप्यकाणि व्ययीकृतानि। किन्तु केवलं नवदिनात्मकस्य विवाहस्य अनन्तरम्, पञ्चनिमेषात्मकं दृश्यसम्भाषणं कृत्वा तेन विवाह-विच्छेदः याचितः!
काव्या- अतीव विचित्रम्! एतावान् धनव्ययः कृतः, किन्तु नवसु दिनेष्वेव विवाहः भग्नः!
इदानीम् अपरः वार्ता-विशेषः दृश्यताम्। अन्तर्जाले एकः समाचारः प्रसृतः अस्ति। एकेन नियोजकेन अभ्यर्थी वेतनं विना षडष्टान् मासान् यावत् कार्यं कर्तुम् आदिष्टः!
नन्दिनी- एषः तु तीव्रः शोषः! कथमपि वेतनं विना एतावन्तं कालं यावत् कार्यं कर्तुं कश्चित् आदिष्टः भवेत्?
अमेरिकादेशस्य मार्गेषु वितरण-यन्त्राणि प्रेषितानि सन्ति। किन्तु जनैः तेषां घोरः विरोधः कृतः, यतः पादचारिभिः मार्गं त्यक्त्वा अपसर्तव्यं जातम्!
काव्या- सत्यम्, यन्त्राणि मनुष्याणां मार्गम् अवरुन्धन्ति, अतः पादचारिणाम् अधिकाराः रक्षिताः भवेयुः।
अपरं समाचारवैचित्र्यम् अपि अस्ति। भाग्यनगरे एकः पुरुषः स्वस्य वाटिका-गृहं गतवान्। तत्र सः एकेन कृष्णेन सर्पेण सह क्रीडन् दष्टः प्राणत्यागं च प्राप्तः।
नन्दिनी- अतीव विचित्रोऽयं समाचारः।
अद्यतने कार्यक्रमे एतावान् एव समाचारः। पुनः सम्भाषणाय मेलिष्यामः, नमो नमः।



# हिमाचलस्य वन्यसम्पदः मूल्याङ्कनम्

> वन्यफलानि-स्वास्थ्योत्पादाः -११,३४० कोटिरूप्यकाणि
> चीड़-पत्रसूचि-आधारित-उद्योगः ५,५०० कोटिरूप्यकाणि
> काष्ठोद्योगः ५,००० कोटिरूप्यकाणि
> वंशाधारित-उद्योगः ७६० कोटिरूप्यकाणि

## ५०० तः अधिकाः वनकर्मचारिणः सङ्गृहीतवन्तः विवरणानि

अध्ययनार्थं सम्पूर्णप्रदेशात् ५०० तः अधिकैः वनकर्मचारिभिः लक्षद्वयात् (२ लक्ष) अधिकानि विवरणानि(आंकड़े) सङ्गृहीतानि। अस्य आधारेण वनानां अङ्कीय-दत्तांशः (डिजिटल डाटा) सज्जः कृतः। ए.आई. इत्यस्य उपग्रह (सेटेलाइट)-तकनीकस्य च साहाय्येन अधुना वनेषु वनाग्निः (दावाग्निः), पर्यावरणीय-सङ्कटाः, जलवायुपरिवर्तनस्य प्रभावाः च अपि अवेक्षितुं शक्ष्यन्ते। वनविभागस्य आईएसबी इत्यस्य च एषः उपक्रमः हिमाचलस्य कृते कश्चन महान् प्रक्रमः मन्यते। विज्ञानां कथनम् अस्ति यत् यदि सर्वकारः स्थानीयसमुदायश्च मिलित्वा कार्यं कुर्यात्, तर्हि वनानि केवलं हरितिमा एव न, अपितु जीविकायाः आर्थिकविकासस्य च सुदृढः आधारः भवितुं शक्नुवन्ति।